Title of Mss. Guru Gita Sloka
Language: Skt-
No. of Folios : 16
Materials : PP
Conservation : Preventive/Curative
Performed by KKHL, MCC: GU
National Mission for manuscripts,
New Delhi,
Date 29|10|06 (48)

ক্লীঁ নেত্রদ্বয়ে। কর্ণদ্বয়ে। হ্রুঁ নাসিকাদ্বয়ে। শ্রীঁ মুখে। ক্লীঁ নাভৌ। হ্রৌঁ লিঙ্গে। ক্লঁ হৃদে।
হ্রুঁ ভ্রূমধ্যে॥ ওঁ ক্লীঁ মুখে নেত্রদ্বয়ে
ঘ্রাণদ্বয়ে। কর্ণদ্বয়ে। হৃদে।
ভ্রূমধ্যে

শ্রীভ. গীতা শ্লোক / তুলাপাত Paper
১—১৮ পাত / ১ পাত- ১ পীঠি /
১৭৮৩ শক / শ্রীশ্রীনাথ শর্মা
লিপি / ২০.৩ x ৮ সে; ৩ম।

Chidananda Goswami
KKHL. MRC Catalogue

শ্রীভ. গীতা
(শ্লোক)

ধাতাশাবজ্রধাহিনিশ্হাবিজং হন্দুশাষিলনাহ। হয়ংমহাঙ্কু সোমবিড়ং

৭ওঁনমোগণেশায ॥ শ্রীগুরুবেনমঃ ॥ নমোঽস্যগুরুগীতাস্তোত্রস্য পরমশিবঋষি
র্বিরাট্ছন্দঃ শ্রীগুরুঃ পরমাত্মাদেবতা হঁবীজং সংশক্তিঃ ক্রোঁ কীলকং শ্রীগুরোঃপ্রসা
১ দাৎ পরমার্থসিদ্ধার্থং জপে বিনিযোগঃ । হংসাং সূর্য্যাত্মনে অঙ্গুষ্ঠাভ্যাং নমঃ ১
হংসীং সোমাত্মনে তর্জনীভ্যাং স্বাহা । হংসূং নিরঞ্জনাত্মনে মধ্যমাভ্যাং বষট্ । হং
সৈঁ নিরাভাষাত্মনে অনামিকাভ্যাং হুঁ । হংসৌঁ অনুসূক্ষ্মাত্মনে কনিষ্ঠাভ্যাং বৌষট্

হংসমস্যকম্জাঙ্গোনেকরত্নপৃষ্ঠাভ্যামস্ত্রায ফট্ । এবংহৃদযাদিষু । হংসাভ্যাপরি
বর্ত্তিপদ্মকমলনৈর্দ্দিকৈর্জ্জগৎকারণৈঃ । বিশ্বোৎকীর্ণমনেকদেহনিলযংস্বচ্ছন্দমাত্মেচ্ছযা
তন্নাদ্যোগ্যতযাস্বদেশিকতনুর্ভাবৈকদী পি[illegible]কুরং । প্রত্যক্ষাক্ষরবিগ্রহংগুরুপদং
ধ্যাযেৎসদাতন্ময়ং । বিশ্বব্যাপকমাদিদেশমমনংনিত্যংপরংনিষ্কলং নিত্যানন্দম
হস্রপদ্মকমলেনিশ্যাক্ষরেমণ্ডপে । নিত্যানন্দমনন্তপূর্ণমখিলংতদ্ব্রহ্মনিত্যংস্মরে

দাত্মানংসমনুপ্রবিশ্যহৃৎহরেস্বচ্ছন্দতঃসর্ব্বগং ॥ সংঅঙ্গুষ্ঠাভ্যাংনমঃ । গুংতর্জনীভ্যাং
স্বাহা । রংমধ্যমাভ্যাংবষট্ । রেংঅনামিকাভ্যাংহুং । নংকনিষ্ঠাভ্যাংবৌষট্ । মঃক
২ রতলপৃষ্ঠাভ্যাংঅস্ত্রায়ফট্ ॥ এবংহৃদয়াদিষু । মন্ত্ররবেনমঃ । কৈলাশশিখরেরম্যে ২
ভক্তিসাধননায়কং । প্রণম্যপার্ব্বতীভক্ত্যাশঙ্করংপরিপৃচ্ছতি ॥ শ্রীপার্ব্বত্যুবাচ ॥
নমস্তেদেবদেবেশপরাৎপরজগদ্গুরো । সদাশিবমহাদেবগুরুগীতাংপ্রদেহিমে । কেন

মার্গেণবাস্বামিনাদেহিব্রহ্মমযোভবেৎ । ত্বংকৃপাংকুরুকামেশ্রহ্মজ্ঞানমামিঠরণন্তব ।
শ্রীশিবউবাচ । যস্যদেবেপরাভক্তির্যথাদেবেতথাগুরৌ । তস্যৈতাংকথিতাগাথাঃ
প্রকাশন্তেমহাত্মনঃ । মমকৃপাসি দেবিত্বংতৎপ্রিত্যর্থংবদাম্যহং । নো
কোপকারকংপ্রশ্নোনোকেনাপিকৃতংপুরা । দুর্লভংত্রিষুলোকেষুত্বংশৃণুস্ববদাম্য
হং । কিঞ্চিত্ত্বৎকৃপবিনানাস্ত্যেতৎসত্যংসত্যবরাননে । বেদশাস্ত্রপুরাণানিচেতিহাসা

দিব্যানিচ । মন্ত্রযন্ত্রাদিবিদ্যানাং স্মৃতিকুচ্চাটনাদিকং । শৈবশাস্ত্রাগমাদীনি
অন্যান্যবহুম্মতানিচ । অপভ্রংশাঃ সমস্তানি জীবনাভ্রান্তিচেতসাং । যজ্ঞব্রতন্তপো
৩ দানং জপতীর্থানুসেবনং । গুরুত ত্ত্বমবিজ্ঞায় নিষ্ফলং নাত্রসংশয়ঃ । গুরু ৩
বুদ্ধ্যাত্মনোনান্যৎ সত্যং সত্যং নসংশয়ঃ । সর্ব্বপাপবিশুদ্ধাত্মা শ্রীগুরোঃপা
দসেবনাৎ । সর্ব্বতীর্থাবগাহস্য ফলং প্রাপ্নোতি নিশ্চিতং । গুরুপাদোদকং সম্যু

ক্সংশারান্নবতারকং । অজ্ঞানমূনহরণং জন্মকর্ম্মানিবারণং । জ্ঞানবৈরাগ্য সিদ্ধার্থং গু
রোঃ পাদোদকং পিবেৎ । গুরুপাদোদকং পেযং গুরুচ্ছিষ্টান্নভোজনং । গুরুমূর্ত্তিসদাধ্যানং
গুরুস্তোত্রং সদাজপেৎ । কাশীক্ষেত্রং নি বাসশ্চ জাহ্নবীচরণোদকং । গুরুর্ব্বিশ্বে
শ্বরসাক্ষাত্তারকং ব্রহ্মনিশ্চিতং । গুরুমূর্ত্তিস্মরেন্নিত্যং গুরুনামং সদাজপেৎ । গুরো
রাজ্ঞাং প্রকুর্ব্বীত গুরোরন্যং নভাবযেৎ । গুরোর্ব্বক্ত্রেস্থিতং ব্রহ্ম প্রাপ্যতে তৎপ্রসাদতঃ ।

স্বাশ্রমঞ্চ স্বজাতিঞ্চ স্বকীর্ত্তিং পুষ্টিবর্দ্ধনং। অন্যৎসর্ব্বং পরিত্যজ্য গুরোরন্যন্নভাব
যেৎ। গুরুবক্ত্রেস্থিতাবিদ্যা গুরুভক্ত্যানুলভ্যতে। তস্মাৎসর্ব্বপ্রযত্নেন গুরোরারাধনংকুরু
৪ গুকারস্থান্ধকারশ্চ রুকারস্তেজউচ্যতে। অজ্ঞানগ্রাসকংব্রহ্ম গুরুরেবনসংশয়ঃ ৪
গুকারঃপ্রথমোবর্ণো মায়াদিগুণভাষকঃ। রুকারোদ্বিতীয়োব্রহ্ম মায়াভ্রান্তিবিমোচকঃ। এবং
গুরুপদংশ্রেষ্ঠং দেবানামপিদুর্লভং। হাহাহুহুগণৈশ্চৈব গন্ধর্ব্বাদ্যৈশ্চপূজ্যতে। আ

সনংশযনংবস্ত্রংবাহনংভূষণাদিকং। সাধকেনপ্রদাতব্যংগুরুসন্তোসকারকং ।।
দীর্ঘদণ্ডনমস্কৃত্যনির্লজ্জোগুরুসন্নিধৌ। আত্মদারাদিকংসর্ব্বংগুরবেচনিবেদযেৎ।
কৃমিকীটভস্ম বিষ্ঠা দুর্গন্ধিমলমূত্র কং। শ্লেষ্মারক্তত্বচংমাংসংসংতনুরিত্থং
বরাননে ।। সংসারবৃক্ষমারূঢ়াঃ পতন্তিনরকার্ণবে। যেনোদ্ধৃতমিদংবিশ্বংতস্মৈশ্রী
গুরবেনমঃ ।।১।। গুরুর্ব্রহ্মগুরুর্বিষ্ণুর্গুরুর্দেবোমহেশ্বরঃ। গুরুরেবপরংব্রহ্মতস্মৈশ্রী

গুরবেনমঃ ৷৷২৷৷ অজ্ঞানতিমিরান্ধস্যজ্ঞানাঞ্জনশলাকয়া ৷ চক্ষুরুন্মিলিতংযেনতস্মৈ
শ্রীগুরবেনমঃ ৷৷৩৷৷ অখণ্ডমণ্ডলাকারংব্যাপ্তংযেনচরাচরং ৷ তৎপদংদর্শিতংযেনত
৫ স্মৈশ্রীগুরবেনমঃ ৷৷৪৷৷ স্থাবরংজঙ্গ মব্যাপ্তংযৎকিঞ্চিৎসচরাচরং ৷ তৎপদংদ ৫
র্শিতংযেনতস্মৈশ্রীগুরবেনমঃ ৷৷৫৷৷ চিন্ময়ংব্যাপিতংসর্ব্বংত্রৈলোক্যংসচরাচরং ৷ তৎ
পদংদর্শিতংযেনতস্মৈশ্রীগুরবেনমঃ ৷৷৬৷৷ সর্ব্বশ্রুতিশিরোরত্নবিরাজিতপদাম্বুজ

বেদান্তাম্বুজসূর্য্যায তস্মৈ শ্রীগুরবে নমঃ ॥৭॥ চৈতন্যং শাশ্বতং শান্তং ব্যোমাতীতং নি
রঞ্জনং । বিন্দুনাদকলাতীতং তস্মৈ শ্রীগুরবে নমঃ ॥৮॥ জ্ঞানশক্তিং সমারূঢ়ং ত
ত্ত্বমালাবিভূষিতং । ভুক্তিমুক্তিপ্রদাতারং তস্মৈ শ্রীগুরবে নমঃ ॥৯॥ অনেকজন্ম
সংপ্রাপ্তকর্ম্মবন্ধবিদারিনে । স্বাত্মজ্ঞানপ্রভাবেন তস্মৈ শ্রীগুরবে নমঃ ॥১০॥
শোষণং ভবসিন্ধোশ্চ দীপনং সারসম্পদং । গুরোঃ পাদোদকং সম্যক্ তস্মৈ শ্রীগুর

বেনমঃ ৷৷ ১১ ৷৷ নগুরোরধিকংতত্ত্বংনগুরোরধিকংতপঃ । তত্ত্বজ্ঞানাৎপরংনাস্তি
তস্মৈশ্রীগুরবেনমঃ ৷৷ ১২ ৷৷ মন্নাথশ্রীজগন্নাথোমদ্গুরুশ্রীজগদ্গুরুঃ । মমাত্মাসর্ব্বভূত
৬ আত্মাতস্মৈশ্রীগুরবেনমঃ ৷৷ ১৩ ৷৷ গুরু রাদিনরাদিশ্চগুরুঃপরমদৈবতং । গুরোঃপ ৬
রতরংনাস্তিতস্মৈশ্রীগুরবেনমঃ ৷৷ ১৪ ৷৷ ধ্যানমূলংগুরোর্মূর্ত্তিঃপূজামূলংগুরোঃপদং
মন্ত্রমূলংগুরোর্ব্বাক্যংমোক্ষমূলংগুরোঃকৃপা ৷৷ ১৫ ৷৷ সপ্তসাগরপর্য্যন্তংতীর্থস্নানা

দিকংফলং । গুরোরংঘ্রিপযোবিন্দুং সহস্রাংশেন দুর্লভং ॥ গুরুরেবজগৎসর্ব্বংব্র
হ্মবিষ্ণুশিবাত্মকং । গুরোঃ পরতরংনাস্তি তস্মাৎসংপূজযেদ্গুরুং ॥ ১৭ ॥ জ্ঞানং
বিনামুক্তিপদংলভতেগুরুভক্তিতঃ ॥ গুরোঃপরতরংনাস্তিধ্যেযোসৌগুরুমার্গিনা
॥ ১৮ ॥ তস্মাৎপরতরংনাস্তি নেতি নেতীতিবৈশ্রুতি । কর্ম্মণামনসাবাচা সর্ব্বেরারা
ধযেদ্গুরুং ॥ ১৯ ॥ গুরোঃকৃপাপ্রসাদেনব্রহ্মাবিষ্ণুসদাশিবঃ । সৃষ্ট্যাদিষুসমর্থা

ক্ষেকেবলংগুরুসেবয়া ॥২০॥ দেবাকিন্নরগন্ধর্ব্বাঃপিতরোযক্ষযক্ষচারণাঃ।মু
নয়োপিনজানন্তিগুরুশুশ্রূষণাদিকং ॥২১॥ নক্ষত্রাদেবগন্ধর্ব্বাঃপিতরোযক্ষ
৭ কিন্নরাঃ।ঋষয়ঃসর্ব্বসিদ্ধান্থগুরু সেবাপরাঙ্মুখাঃ ॥২২॥ ধ্যানংশৃণুম ৭
হাদেবিসর্ব্বানন্দপ্রদায়কং।সর্ব্বসৌখ্যকরংনিত্যংভুক্তিমুক্তিবিশারদং ॥২৩॥
শ্রীমৎপরংব্রহ্মগুরুংবদামি শ্রীমৎপরংব্রহ্মগুরুংভজামি শ্রীমৎপরংব্রহ্মগু

কংস্মরামি শ্রীমদ্গুরুংব্রহ্মযুক্তংনমামি ॥২৪॥ ব্রহ্মানন্দং পরমসুখদংকেবলং
জ্ঞানমূর্ত্তিং দ্বন্দাতীতংগগণশদৃশংতত্ত্বমস্যাদিলক্ষ্যং একংনিত্যংবিমলমচলংস
র্ব্বদাসাক্ষিভূতংভাবাতীতংত্রি গুণরহিতং সদ্গুরুংতংনমামি ॥২৫॥ নিত্যং
শুদ্ধংনিরাভাষং নিরাকাশং নিরঞ্জনং । নিত্যবোধংচিদানন্দং গুরুংব্রহ্মনমাম্যহং
হৃদম্বুজেকর্ণিকমধ্যসংস্থং সিংহাসনেসংস্থিতদিব্যমূর্ত্তিং । ধ্যায়েদ্গুরুংচন্দ্রকলা

বতাংশংসদ্ভিস্সুধাভিষ্টবরপ্রদানং । শ্বেতাম্বরংশ্বেতবিলেপযুক্তংমুক্তাফলৈর্ভূষিত
দিব্যমূর্ত্তিং । বামাঙ্গপীঠেস্থিতদিব্যশক্তিংমন্দস্মিতংপূর্ণকৃপানিধানং । আনন্দ
৪ মানন্দকরংপ্রসন্নংজ্ঞানস্বরূপংনিজ বোধযুক্তং । যোগেন্দ্রমীড্যংভবরোগবৈ ৪
দ্যংশ্রীমদ্গুরুংনিত্যমহংভজামি ॥ প্রাতঃশিরসিশুক্লাব্জে দ্বিনেত্রংদ্বিভুজংগু
রুং । বরাভয়করংশান্তংস্মরেত্তন্নামপূর্ব্বকং । নগুরোরধিকংনগুরোরধিকংনগুরো

রুধিকং নষ্ঠুরোবধিকং। শিবসাসনতঃ শিবসাসনতঃ শিবসাসতঃ শিবসাসনতঃ
ইদমেবশিবং ইদমেবশিবং ইদমেবশিবং ইদমেবশিবং। মমসাসনতো মমসাস
নতো মমসাসনতোমমসাসনতঃ। এবংবিধং গুরুধ্যাত্বাজ্ঞানমুদ্রাঙ্কিত
স্বযং। তদাগুরোপ্রসাদেনমুক্তোহমিতিভাবযেৎ। গুরুণাদর্শিতোমার্গেমনশুদ্ধিংতু
কারযেৎ। অনিত্যংখণ্ডযেৎসর্ব্বং যৎকিঞ্চিদাত্মগোচরং। ক্ষেযং সর্ব্বমনিত্য

শুদ্ধজ্ঞানশুভমনউচ্যতে । জ্ঞানংতুযংসমংকুর্য্যাৎ ন্যায়োপার্থাংদ্বিতীযকং ।
এবংশ্রুত্বামহাদেবিগুরুনিন্দাংকরোতিযঃ । সজাতিশরকংঘোরংযাবচ্চন্দ্রাদি
৯ বাকরৌ । যাবদ্দেহাস্তকল্পান্তে তাবদ্দেবগুরুংস্মরেৎ । গুরুলোকেনব ৯
জব্যংস্বচ্ছন্দোযদিবাভবেৎ । গুরোরগ্রেনবক্তব্যমসত্যঞ্চকদাচন । যোবৈহুঁ
কৃত্য হুঁকৃত্য গুরুংনির্জ্জিত্যবাদিতঃ । অরণ্যেনির্জ্জনেস্থানে সভবেদ্ব্রহ্মরাক্ষসঃ

মুনিভিঃ পন্নগৈর্ব্বাপি সুরৈর্ব্বা কুপিতো যদি । কালমৃত্যুভয়াদ্বাপি গুরুর্ব্রক্ষতি পা
র্ব্বতি । অশক্তাহি সুরাঃ সর্ব্বেঅশক্তা মুনয়স্তথা । গুরুশাপহতাক্ষীণাংক্ষ
য়ংয়ান্তিনসংশয়ঃ । মন্ত্ররাজমি দংদেবিগুরুমিত্যক্ষরদ্বয়ং । শ্রুতি
বেদান্তবাক্যেনগুরুঃসাক্ষাৎপরংপদং । শ্রুতিস্মৃতিমবিজ্ঞায়কেবলংগুরুসেব
কাঃ । তেবৈসন্ন্যাসিনঃপ্রোক্তাইতরোবেশধারিণঃ । গুরোঃকৃপাপ্রসাদেনআত্মা

রামোহহিনশ্যতে । অনেনগুরুমার্গেন আত্মজ্ঞানং প্রবর্ত্ততে । আব্রহ্মস্তম্বপর্য্যন্তং
পরমাত্মাস্বরূপকং । স্থাবরঞ্জংগমঞ্চৈবপ্রণমামিজগন্ময়ং । ব্রহ্মহংসচ্চিদানন্দ
১০ বেদান্তীতংসদাগুরুং । নিত্যংপূর্ণংনি রাকারংনির্গুণংস্বাত্মসংস্থিতং । পরাৎ ১০
পরতরংধ্যেয়ংনিত্যমানন্দকারকং । হৃদয়াকাশমধ্যস্থংশুদ্ধস্ফটিকসন্নিভং । অ
ঙ্গুষ্ঠমাত্রংপুরুষংধ্যায়তেচিন্ময়ংহৃদি । তত্রস্ফুরতিযোভাবঃশ্রুত্বাতংকথয়াম্যহং

অগোচরস্তথারম্যংরূপনামাদিবর্জ্জিতং । নিঃশঙ্কস্তুবিজানীয়াৎস্বভাবংব্রহ্মপার্ব্বতি
তথানিজস্বভাবেনকর্পূরংকুঙ্কুমাদিকং । শীতোষ্ণাদিস্বভাবেনযথাব্রহ্মসনাতনং
যুক্তখ্যানাত্তথানিত্যংদেহিব্রহ্মময়ো ভবেৎ । পিণ্ডপাদেতথারূপেমুক্তাস্তে
নাত্রসংশয়ঃ ।। শ্রীপার্ব্বত্যুবাচ ।। পিণ্ডংকিন্তন্মহাদেবপদংকিংসমুদাহৃতং
রূপরূপাতীতঞ্চৈবতত্তদাখ্যাহিশঙ্কর ।। শ্রীশিবউবাচ ।। পিণ্ডংকুণ্ডলিনীশ

ক্তিঃ পদংহংসমুদাহৃতং । রূপংবিন্দুরিতিজ্ঞেয়ংরূপাতীতংনিরঞ্জনং । সোহংসর্ব্ব
ময়োহস্থা পরংব্রহ্মময়োভবেৎ । পরাৎপরতরংনাস্তিসর্ব্বমেবনিরাময়ং । যস্যা
১১ বলোকনাদেবসর্ব্বসঙ্গবিবর্জ্জিতঃ । একাকীনিস্পৃহঃশান্তঃ স্তৎক্ষণাদ্ভবতি ১১
প্রিয়ে । নর্ব্বংবাথননর্ব্বাবা স্বনপংবাবহুনংতথা । নিষ্কামেনৈবভোক্তব্যংসদা
সন্তুষ্টমানসঃ । সদানন্দঃ সদাসাক্ষোরমন্তেস্বয়ম্ব্রুমাঠিং । যত্রৈবতিষ্ঠতিসোপি
য়

সদেশঃপুন্যভাজনঃ । মুহূর্ত্তক্ষনক্ষণংদেবি তবাগ্রেকথিতংময়া । উপদেশোময়া
দেবিগুরুমার্গেনদর্শিতঃ । গুরুভক্তেস্তথাধ্যানং সকলংতবকীর্ত্তিতং । অনেন
যদ্ভবেৎকার্য্যং তদ্বদামিমহাতপে । লোকোপকারকংদেবি লৌকিকন্তুনভা
বয়েৎ । লৌকিকাৎকর্ম্মতোযান্তি জ্ঞানহীনাভবার্ণবে । ইদন্তুভক্তিভাবেনপঠ্যতেশ্রূয়
তেঽথবা । লিখিত্বাবাপ্রদীয়েতসর্ব্বকামফলংলভেৎ । গুরুগীতাভিধংদেবি শুদ্ধং

ত্ত্বমযোদ্দিতং। ভবব্যাধিবিনাশার্থং স্বয়মেবসদাজপেৎ। গুরুগীতাক্ষরৈকৈকং
মন্ত্ররাজমিদংপ্রিয়ে। অন্যাবিবিধামন্ত্রাঃকলাংনার্হন্তিষোড়শীং। সর্ব্বপাপস
২২ মুহঘ্নং সর্ব্বদারিদ্রনাশনং। অকান মৃত্যুহরণং সর্ব্বসাঙ্কটনাশনং। যক্ষরা ২২
ক্ষসভূতানাংচৌরব্যাঘ্রভয়াপহং। মহাব্যাধিহরংচৈববিভূতিসিদ্ধিদংভবেৎ। মো
হনংসর্ব্বভূতানাংবন্ধমোচনকংপরং। দেবত্বপ্রিয়করংলোকানাংবশমানয়েৎ

সুখস্কন্দকরং নৃণাং সদ্গুণানাং বিবর্দ্ধনং । দুষ্কর্ম্মনাশনঞ্চৈব সৎকর্ম্মসিদ্ধিদং
ভবেৎ । অন্তিজিদং সিদ্ধযেৎকার্য্যং নবগ্রহভয়াপহং । দুঃস্বপ্ননাশনঞ্চৈব সুস্বপ্নানাং
বিবর্দ্ধনং । সর্ব্বশান্তিকরং নিত্যং বন্ধ্যাপুত্রফলপ্রদং । আবেধককরং স্ত্রী
নাং সৌভাগ্যদায়কং পরং । আয়ুরারোগ্যমৈশ্বর্য্যং পুত্রপৌত্রাদিবর্দ্ধনং । নিষ্কাম
তস্ত্রিবারং বা জপেন্মোক্ষমবাপ্নুয়াৎ । সর্ব্বদুঃখভয়ং বিঘ্নং নাশয়েত্তাপহারকং

সর্ব্বাবাধাপ্রসমনং ধর্ম্মকামার্থমোক্ষদং । যং যং চিন্তয়তে কামং তং তমাপ্নোতি নি
শ্চিতং । কামিনাং কামধেনুস্থকল্পিতস্য সুরদ্রুমঃ । চিন্তামনিশ্চিন্তিতস্য স
১৭ র্ব্বমঙ্গলকারকং । জপেচ্ছাক্তশ্চ শৈব শ্চ গাণপত্যশ্চ বৈষ্ণবঃ । সৌরশ্চ ১৭
সিদ্ধিদং দেবি ধর্ম্মকামার্থমোক্ষদং । সংশারমলনাশার্থং ভবতাপনিবৃত্তয়ে । গু
রুগীতাম্ভসি স্নানং তত্ত্বজ্ঞঃ কুরুতে সদা । স এব সদ্গুরুঃ সাক্ষাৎ সদসদ্ব্রহ্মবিত্তমঃ

তস্যস্থানিঁ পবিত্রানিনসংশয়ঃ । সদেশঃ শুদ্ধোযত্রাসৌগীতাতিষ্ঠতে দুর্লভা
তত্রাদেবগণাঃ সর্বেক্ষেত্রেপীঠেবসন্তিহি । শুচিরেবসদাজ্ঞানীগুরুগীতাজপেন্নতু
তস্যদর্শনমাত্রেন পুনর্জন্মনবিদ্যতে । সত্যং সত্যং পুনঃসত্যং নিজধর্মম
যোদিতঃ । গুরুগীতাসমোনাস্তি সত্যং সত্যংবরাননে । গুরুর্দেবোগুরুর্ধর্ম্মোগু
রুর্নিষ্ঠাপরন্তপঃ । গুরুঃ পরতরংনাস্তিনাস্তিতত্বংগুরোঃ পরং । ধন্যামাতা

পিতাধন্যোধন্যবংশকুলন্তথা । ধন্যাবসুন্ধরাদেবি গুরুভক্তিসুদুর্লভা । শরীর
মিন্দ্রিয়ঃপ্রাণা অর্থস্বজনবান্ধবাঃ । পিতামাতাকুলন্দেবি গুরুরেবনসংশয়ঃ
১৪ আজন্মকোট্যাংদেবেশিজপব্রততপঃ পংক্রিয়া । তৎসর্ব্বংসফলন্দেবি ১৪
গুরুসন্তোষমাত্রতঃ । বিদ্যাধনমদেনৈব মন্দভাগ্যাশ্চয়েনরাঃ । গুরোঃসেবাং
নকুর্ব্বন্তিসত্যংসত্যংবদাম্যহং । গুরোঃসেবাপরংতীর্থমন্যতীর্থমনর্থকং

সর্ব্বতীর্থাশ্রমং দেবি সদ্গুরোশ্চরণাম্বুজে । ইদং রহস্যং নোবাচ্যং তবাগ্রে কথি-
তং ময়া । সুগোপ্যঞ্চ প্রজত্নেন যেনাত্মানং প্রপশ্যসি । ষড়াননগণেশাদি বি-
ষ্ণবানাঞ্চ পার্ব্বতি । মনসাপি ন বক্ত- ব্যং মম সান্নিধ্যকারকং । অতীবচি-
ত্তশান্তে চ শ্রদ্ধাভক্তিসমন্বিতে । প্রবক্তব্যমিদং দেবি মমাত্মাসি সদা প্রিয়ে
অভক্তে বঞ্চকে ধূর্ত্তে পাশাণ্ডে নাস্তিকে নরে । মনসাপি ন বক্তব্যং গুরুগীতাভিধং

প্রিয়ে । স্বাগমোনির্গমশ্চৈব নির্ব্বানস্থস্তথাগমঃ । তস্মাদুদ্ধৃত্য দেবেশি গুরু
গীতামযোদ্দিতা । গুরবোবহবঃ সন্তি শিষ্যাবৃত্তাপহারকাঃ । দুর্লভোযং গুরো
১৫ দ্দেবি শিষ্যসন্তাপহারকঃ । সংসার সাগরসমুদ্ধরণৈকমন্ত্রং ব্রহ্মাদি ১৫
দেবমুনিপূজিতসিদ্ধমন্ত্রং । দারিদ্রদুঃখভয়শোকবিনাশমন্ত্রং বন্দে মহা
ভয়হরং গুরুরাজমন্ত্রং ॥ ॥ ॥ ইতিরুদ্রজামলে হরপার্ব্বতীসম্বা

ম্বাদে শ্রীগুরুগীতাস্তোত্রং সমাপ্তং ॥ ❋ ॥ শৈলাষ্টসপ্তচন্দ্রেঠ শাকে
তীতে প্রজন্মতঃ । নিখিতা শ্রী গুরোস্তোত্রং শ্রীনীলাম্বর শর্ম্মণঃ ॥
১৬ ত্রিযুগ্ম যুগ্মচন্দ্রেঠ অব্দিমানে প্রস্বন্নতঃ । মিথুনে তদ্দিনে শশ্ব সমাপ্তো ১৬
মঙ্গলবাসরে ॥ ❋ ॥ শকাব্দা: ১৭৮৭। সন ১২৭২। শ্রীশ্রী ॥ ❋ ॥ ❋ ॥

